है ॥ और ३० तीस से काटे हुई नत ही उन्नत होती है ॥ नियम है कि पूर्वोन्नत इष्टकाल हो, तो छःराशि युक्त सूर्यस्पष्ट से, पश्चिमनत हो, तो केवल सूर्य से लग्न सा लङ्कोदयों से दशमलग्न सिद्ध होता है ॥ छः· राशियुक्त करके चतुर्थभाव होता है ॥ जैसा इष्ट २।१३ मध्याह्न से नीचे होने से दिनार्ध १६।४२ और इष्ट का अन्तर होवा पुर्वनत १४।२६ तीस से काट कर होवा पूवोन्नत १५।३१ दशमलग्न का इष्टकाल । इस से दशमलग्न साधना (जैसा) सायनसूर्य १।६।५८। ३५ पूर्वोन्नत इष्ट होने से छःराशि युक्त ७।६।५८। ३५ उस के भोग्यभाग २०।१।२५ वृश्चिकोदय से २९९ गुणित ५९८०।२९९।७४७५ नीचे साठ से उपर तीस से भाग देकर लब्ध १९९।१७।२।३५ भोग्यकाल इष्ट.

१५। ३१ पलात्मक ६३१ से काट कर रहा ७३१। १२। ५६। २५ उस से धन्योदय ३२३ मकरोदय ३२३ काट के शेष ८५। १२। ५६। २५ से कुम्भोदय २६६ हीन न होने से अशुद्धोदय होवा। शेष तीस से गुणित २५५० नीचले अङ्क १२ युक्त को २५६२ अशुद्धोदय २६६ से लब्ध अंश ८ शेष १७० साठ से गुणित १०२०० नीचले अङ्क ५६ युक्त १०२५६ को अशुद्ध २६६ से लब्ध कला ३४ शेष ६०। से विकला १६ अशुद्ध कुम्भ १० राशियुक्त अंशादि १०। ८। ३४। १६ अयनांश हीन होघा दशमलग्न ६। १४। ५६। १६ छः राशियुक्त ३। १४। ५६। १६ होवा चतुर्थभाव॥ (शेष भाव साधन) लग्नोनसुखषष्ठांशं व्येकं दद्यात्तयोः पृथक्। सषड्भं च भवेद्भावमण्डलं सन्धिसंयुतम्॥ लग्न हीन चतुर्थ भाव का षष्ठांश

और एक से काटा हुवा षष्ठांश व्येकसंज्ञक, यह दो अन्तर अलग २ उन लग्न व चतुर्थभावों को देकर लग्न से षष्ठ तक

१		२	.	३		४		५		६	
१	१	२	२	२	३	३	४	४	५	६	६
९	२०	१	१२	२३	४	१४	४	२३	१२	१	२०
५८	४८	३८	२८	१९	९	५९	९	१९	२८	३८	४८
३५	४२	४९	५७	४	११	१९	११	४	५७	४९	४२
७		८		९		१०		११		१२	
७	७	८	८	८	९	९	१०	१०	११	०	०
९	२०	१	१२	२३	४	१४	४	२३	१२	१	२०
५८	४८	३८	२८	१९	९	५९	९	१९	२८	३८	४८
३५	४२	४९	५७	४	११	१९	११	४	५७	४९	४२

सन्धियुक्त छःभाव होते हैं। और वह सब छःराशियुक्त कर के, सप्तम से द्वादश तक सन्धियुक्त और छःभाव होते हैं। (जैसा) कल्पित लग्न १।६। ५८।।३५ से चतुर्थभाव ३।१४।५६।१६ ऊनित २। ५।०४४ का षष्ठांश ०।१०।५०।७।२० लग्न से, एकोनषष्ठांश ०।१६।६।५२।४० चतुर्थभाव से देकर सन्धियुक्त छःभाव होते हैं। और वह सब छःराशियुक्त कर के और छःभाव सन्धियुक्त बनते हैं। चक्र से स्पष्ट देखना ॥

(मुन्था) सैका गताब्दा विहृताः पतङ्गैस्तच्छेषभावी च मुथी जनोर्भात् ॥ जैसा गताब्द १ एक मिला कर २ बाराह से भाग देकर शेष २ जन्मलग्न धनु से आया दूसरा मकर में मुन्था लग्न लेखना ॥

१ (वर्षचक्र) वृलंबुके, वृंभौरा, धंचं, मंजीमुं, मीशुश, मेसू।

वर्ष पर हद्दाचक्रं (होरा)

मे	वृ	मि	क	सिं	कं	तुं	वृं	धं	मं	कुं	मी
मी ६	वृ ८	मि ६	वृं ७	मी ६	मि ७	मं ६	वृं ७	मी १२	मि ७	मि ७	वृ १२
वृ १२	मि १४	वृ १२	वृ १३	वृ ११	वृ १७	मि १४	वृ ११	वृ १७	मी १४	वृ १३	मी १६
मि २०	धं २२	धं १७	मि १९	मं १८	मी २१	मी २१	मि १९	मि २१	वृ २२	मी २०	मि १९
वृं २५	मं २७	वृं २४	मी २६	मि १४	वृं २८	वृ २८	मी २४	वृं २६	मं २६	वृं २५	वृं २८
मं ३०	वृं ३०	मं ३०	मं ३०	वृं ३०	मं ३०	वृं ३०	मं ३०	मं ३०	वृं ३०	मं ३०	मं ३०

२ (भावचक्र) १सूबु, २के, ७भौ, ८चं०रा, १०जी, ११श०, १२शु
३ (हद्दाचक्र) वृलंभौबुश, मिसूजी, धंचं, मेशु, ॥
४ (त्रैराशिकचक्र) मिलंचंशु, सिंसू, वृंभौशु, धंजी, मंश, ।
५ (मुसुल्लचक्र) कुंलंजीशुरा, वृचं, सिंसूशके, तुंभौ, मंबु, ॥
६ (जन्मचक्र) धंलंजीरा, कुंश, मेसूभौशु, वृबु, मिके, कचं, ।

(हर्षबलचक्र) नन्दात्रिषट्लग्नभवर्क्षपुत्रेऽव्ययौ इनाद्धर्षबलं स्वभोच्चम् । त्रिभं त्रिभं लग्नभतः क्रमेण स्त्रीणां नृणां रात्रिदिनेषु तेषु ॥ कुण्डली में सूर्यादिग्रहों को ९, ३, ६, १, ११, ५, १२ इन स्थानों में प्रथम ५ स्थानबल है । अपने राशियों में या उच्च में हो, तो दूसरा स्वभोच्चबल है । लग्न से तीन ३ घरों में क्रम से स्त्रीग्रह, और पुंग्रहों, याने, १, २, ३, ७, ८, ९, में 'चं, बु, शु, श' और ४, ५, ६, १०, ११, १२, में 'सू, भौ, जी' को, तीसरा स्त्रीपुंबल है ।

और रात्रि में वर्ष हो, तो स्त्रीग्रहों, दिन में हो, तो पुंग्रहों को चौथमा रात्रिबल, या दिनबल है। इन चार बलों के योग को हर्षबल कहते हैं ॥ चक्र में देखना।

(त्रिपताकाचक्र) रेखात्रयं तिर्यगऽथोर्ध्वसंस्थमऽन्योन्यविद्धाग्रगमेककोणात्। स्मृतं बुधैस्तत्त्रिपताकचक्रं प्राङ्मध्यरेखाग्रगवर्षलग्नात् ॥ १ ॥ न्यसेद्भचक्रं किल तत्र सैकं याताऽब्दसंख्यं विभजेन्नभोगैः। शेषोन्मिते जन्मगचन्द्रराशेस्तुल्ये च राशौ विलिखेच्छशाङ्कम् ॥ २ ॥ परे चतुर्भाजितशेषतुल्ये स्थाने स्वराशेः खचरास्तु लेख्याः। स्वर्भानुविद्धे हिमगौ तु कष्टं तापोऽर्कविद्धे रुगिनाऽन्यविद्धे ॥ ३ ॥ महीजविद्धे तु शरीरपीडा शुभैश्च विद्धे जयसौख्यलाभाः। शुभा-

ऽशुभऽयोमगवीर्यतोऽत्र फलं च वर्षस्य वदेत्सुधीमान्
॥ ४ ॥ उपर तीन, टीडे तीन, रेखा रख के, एक-
कोण से आपस में मिले हुई नुकवाले चक्र को त्रिप-
ताकाचक्र कहते हैं। उस के उपर के मध्यरेखा से
वर्षलग्न लिखना ॥ फिर सैक गताब्द को नौ ९ से भाग देकर
शेष २ के समान जन्मलग्नराशि कर्कट से दो अन्तर
से कन्या में चन्द्र लिखना। और चार से भी दो ही
शेष रहता। इस लिये शेषग्रह भी जन्मचक्र के राशिया
से दोनों के अन्तर पर लिखना ॥ (फल यह है) चन्द्र
राहु से विद्ध हो, तो कष्ट, सूर्य से ताप, शनि से
रोग, भौम से देहपीडा, और शुभग्रहों से विद्ध हो,
तो जय, सुख और लाभ देता है ॥ (त्रिपताकाचक्र)
वृलं, मिसूभौशु, कबु, सिंके, कंचं, कुंजीरा, मेश ॥
(फलं) चन्द्र शनि से विद्ध होने के कारण रोगकी

पीडा होवे ॥ (वर्षदृष्टि) तृतीयैकादशे पादं दलं व्योमं
चतुर्थयोः । त्रिकोणे व्यङ्घ्रिः सप्तके पूर्णं पश्यति खेचरः॥
ग्रह ३ । ११ घर पर पाददृष्टि से ४ । १० पर आध दृष्टि से
५ । ६ पर पादोनदृष्टि और १ । ७ घर पर पूर्णदृष्टि से देखता
है ॥ (वर्ष पर नैसर्गिकशत्रुमित्रचक्रं) मित्राण्याऽर्कशशाङ्क-
शक्रसचिवा भौमाऽर्किदेवार्चिता जीवाऽर्कक्षणदाधिपाः
शनिसितौ चन्द्रार्कभूनन्दनाः । सौम्याऽदित्यभवौ शशा-
ङ्कजसितौ मन्दज्ञशुक्रा इमे सूर्यात्स्यू रिपुवस्तु ताजिकमते
शेषा बुधैश्चोदिताः ॥ (वर्ष पर तात्कालिकशत्रुमित्रचक्रं)
मित्रं तृतीयपञ्चमनवमैकादशगतोऽपि यो यस्य । धनरि-
पुमृत्युरिष्फेषु समो ग्रहः स्यादिति ज्ञेयम् । शत्रुस्तथैक-
चक्रे तुर्ये जायास्थाने तथा दशमे ॥ दोनों चक्रों में जो ग्रह

मित्र हो, वह 'अधिमित्र' दोनों में शत्रु 'अधिशत्रु' मित्र व शत्रु 'सम' मित्र व सम 'मित्र' सम व शत्रु 'शत्रुसंज्ञक' है ॥ यह पञ्चधा मैत्री चक्र से स्फुट है ॥ (पञ्चवर्गी) वीर्याऽज्ञानाद्दूषनाथं सिद्धं कर्तुं न शक्यते । पञ्चवर्गीमऽतो वक्ष्ये खेटानां वीर्यव्यक्तये ॥ तुङ्गं स्वगृहं हद्दां त्रैराशिकं मुसुंल्ल-श्चेति । पञ्च गृहाधिकारान्विनाऽधिकारं ग्रहो न बली ॥ (इन का बल प्रथम उच्च का लाना) नीचोनितो गृहः षड्भाऽधिको मण्डलशोधितः । शेषस्यांशा नन्दभक्ता बलमुच्चस्य जायते ॥ (जैसा) सूर्यस्पष्ट ० । १६ । २३ । २३ अपनेनीच ६ १० से रहित ६ । ६ । २३ । ३३ छःराशियों से जादा होने से बाराह १२ से काट कर होवा ५ । २३ । ३६ । ३७

इस के अंशों १७३ । ३६ । ३७ को, नौ ९ से भाग देकर होवा, कलादिक १९ । १७ सूर्य का उच्चबल। इसी रीति से और ग्रहों का भी करना ॥(और चक्रोंका बल)॥
त्रिंशत्स्वभे विंशतिरात्मतुङ्गे तिथिः सुहृद्भे दशकं त्रिकोणे । नवांशके पञ्च भवत्यथाऽशीतिरेवं युगांशाश्च विशोपकाः स्युः ॥ उक्ताः कलाः स्वर्च्चगते ग्रहेन्द्रे प्रत्येकवर्गे त्वधिमित्रगेहे । स्वाङ्घ्र्यंशहीना हितगेहसंस्थे स्वार्धोनिताः स्वाङ्घ्रिलवत्रयोनाः । समर्च्चगे शत्रुगृहोपयाते निजाष्टमांशप्रमितं बलं स्यात् । अधिद्विषद्भोपगते स्वकीये नृपांशलिप्ता इति वर्गवीर्यम् ॥ यथागतं तुङ्गबलं तु तेन समन्वितं वर्गबलं बलं स्यात् ॥ बाणैर्नष्टबलो ग्रहो दशमितैर्मध्यो विशोपै-

स्ततः । श्रेष्ठो घस्रमितैः सुखार्थजनकः प्रोक्तः खेंद-
स्रैर्भवेत् ॥ (त्रैराशिपतिचक्र) त्रैराशिपाः सूर्यसितौ-
ऽर्किशुक्रौ दिवा निशीज्येन्दुबुधक्ष्माजाः । मेषाच्चतुर्णां
हरिभाद्विलोमं नित्यं परेष्वाऽर्किकुजेज्यचन्द्राः ॥
(पञ्चाधिकारियोंमें वर्षेश्वर का विचार) जन्मलग्नपति-
रित्थहाधिपोऽहर्निशं रविशशाङ्कराशिपः । स्युस्त्रिरा-
शिपतिरब्दलग्नपः पञ्च हायनपतित्वयोग्यकाः ॥ लग्नं
प्रपश्यन्नऽधिवीर्य एषां वर्षेश्वरः स्यादथ दृष्ट्यभावे ।
वीर्याधिकोनाब्दपतिर्विवीर्यो लग्नं प्रपश्यन्नपि हायनेशः ॥
वीर्ये समानेऽपि तनुं प्रपश्यन्दृष्ट्याधिको वर्षपतिर्वि-
धेयः । दृष्टौ समायां वहुवोऽधिकारा यस्येषु वर्ग्यो
शरदीश्वरः स्यात् ॥ जन्मलग्नस्वामी, मुन्थेश्वर, दिन

में वर्षप्रवेश हो, तो सूर्याक्रान्तराशि का स्वामी 'दिनेश्वर' रात में हो, तो चन्द्राक्रान्तराशि का स्वामी 'रात्रीश्वर' और 'वर्षलग्नेश्वर' यह पांछ वर्षेश्वर होने के अधिकारी हैं। इन पाछों में से जो लग्न को देखता हुवा पञ्चवर्गी में बलिष्ठ भी हो, वह वर्षेश्वर है। क्योंकि, दृष्टि न होने पर जो बलिष्ठ हो, सो रखना। तथा लग्न को देखता होवा भी बलहीन वर्षेश्वर न होता है। और दो ग्रह समबल होने वालियों में से बहुत अधिकारी वर्षेश्वर होता है ॥(पञ्चाधिकारीं)

१ जन्मपः जीवः	३ दिनपः भौमः	५ वर्षपः शुक्रः
२ मुन्थापः शनिः	४ त्रैराशिपः शुक्रः	६ वर्षेश्वरः भौमः

(मास लाना) मासाऽब्दयोः सूर्ययोर्यदऽन्तरात्सूर्यभुक्तिहृत्। फलं संस्कृत्य तन्मिश्रे मासारम्भः स्फुटो भवेत् ॥ नक्षत्रपत्री पर माससूर्यस्पष्ट १।१६।५३।

२६ । वर्षसूर्यस्पष्ट ० । १६ । २३ । २३ स्वेष्टमासानुरूप एकराशियुक्त १ । १६ । २३ । २३ का अन्तर ० । ० । ३० । ६ को मासार्कगति ५७ । १५ से भाग देकर प्राप्त फल ३१ । १८ वर्षसूर्य कम होने से मिश्र को ४७ । ३४ काट के होआ । मासप्रवेश का इष्ट १६ । १६ (अब लिखने की रीति) सं ५०१३ ज्येष्टवदि षष्ठ्यां चन्द्रे इष्टं १६ । १६ सिंहोदये श्रीमतो हरीश्वरस्य द्वितीयमासप्रवेशः शुभदोऽस्तु ॥ (मासकुण्डली) सिलं, वृंभौरा, मंचंजीमु, मीश, मेबुशु, वृसूके ॥ "इसी रीति से सब मास बनाना" ॥ (सहमलाना) शोध्यर्क्षशुद्धाश्रयमन्तराले लग्नं न चेत्सैकभमेतदुक्तम् ॥ "सहमों पर यह नियम है" कि काटनीयग्रह और काटकग्रहों के राशियों में जब लग्नराशि न आवे, तो सहमस्पष्ट को सैकराशि करना (जैसा) पुण्यसहम

पर । काटकरवि ० । १६ । २३ । २३ काटनीयचन्द्र ८ । ५ । २२ । १७ से काट के होवा ७ । १८ । ५८ । ५४ लग्न १ । ३ । २७ । २० से युक्त ८ । २२ । २६ । १४ अब विचारना, कि सूर्यराशिमेष से, चन्द्रराशिधनु तक बीच में लग्नराशिवृष आये है, इस वास्ते एकराशि न मिलाकर होवा दिनेष्टवाले का पुण्यसहमलग्न ॥ (रात्रि हो) तो उलटा करना, जैसा) काटक चन्द्र ८ । ५ । २२ । १७ काटनीयसूर्य से ० । १६ । २३ । २३ काट कर ३ । ११ । १ । ६ लग्न से १ । ३ । २७ । २० युक्त ५ । १३ । २८ । २६ चन्द्रराशि से सूर्यराशि तक लग्नराशि न आने के कारण, एकराशिमेलाकर होवा, रात्रि में पुण्यसह-मलग्न ६ । १४ । ३७ । २६ ऐसी रीति से और सहम भी बनाना ॥ (और सहमों के नाम) पुण्यं, रवि-

श्चन्द्रात् शोध्यः । रात्रौ विलोमं, लग्नं क्षेप्यम् ॥
[२]मित्रं, पुण्यसहमं गुरुसहमाच्छोध्यं, रात्रौवि, लंक्षे ॥ गुरुः[३],
चन्द्रो रवेः, रात्रि, लंक्षेप्यं ॥ विद्यां[४], चन्द्रो रवेः,
रात्रौवि, लंक्षे ॥ यशः[५], पुण्यं जीवात्, रावि, लं ॥
माहात्म्यं[६], भौमः पुण्यात्, रात्रि, लं ॥ आशा[७],
शुक्रः शनेः, रात्रि, लंक्षेप्यं ॥ सामर्थ्यं[८], लग्नपो भौ-
मात्, रात्रि, लंक्षेप्यं ॥ राज्यं[९], रविः शनेः, रात्रौवि,
लंक्षे ॥ पितृं[१०], राज्यवत् । मातृं[११], शुक्रश्चन्द्रात्,
रात्रि, लंक्षे ॥ भ्रातृं[१२], शनिः जीवात्, रावि, लंक्षे ॥
पुत्रं[१३], चन्द्रः जीवात्, रात्रौ च, लंक्षे ॥ [१४]जीवितं,
जीवः शनेः, रात्रि, लंक्षे ॥ [१५]कर्म, बुधः भौमात्,
रात्रि, लं ॥ रोगं[१६], चन्द्रो लग्नात्, रात्रौ च, लं ॥

प्रसव[१७]:, बुधो जीवात्, रावि, लंक्षे ॥ शास्त्र[१८], शनिर्जीवात्, रात्रौ शनिर्बुधात्, लंक्षे ॥ मृत्यु[१९], चन्द्रोऽष्टमभावात्, रात्रौ च, ॥ अर्थे[२०], धनपो द्वितीयभावात्, रात्रौ च, लंक्षे ॥ कार्ये[२१], रविः शनेः, रविराशिपतिः क्षेप्यः। रात्रौ चन्द्रः शनेः, चन्द्रराशिपःक्षेप्यः। विवाहे[२२], शनिः शुक्रात्, रात्रौ च, लग्नं क्षेप्यं ॥ चन्द्रः शनेः, रात्रौ च, षष्ठभावः क्षेप्यः ॥ बलं[२४], पुण्यसहमंजीवात्, रावि, लंक्षे ॥ रिपु[२५], शनिभौमात्, रावि, लंक्षे ॥ उपाय[२६], जीवः शनेः, रावि, लंक्षे॥ शौर्य[२७], पुण्यं भौमात्, रावि लंक्षे ॥ कन्या[२८], चन्द्रो भृगोः, रावि, लंक्षे॥ जाया[२९], शुक्रः सप्तमेशाद्विशोध्यः रात्रौ विलोमं, सप्तमभावः क्षेप्यः ॥

इति सहमानि ॥

(मुद्दादशा) जन्मर्क्षसंख्यासहिता गताब्दा द्विरूनिता नंन्दहृते तु शेषात् । सूचंभौराजीशबुकेशुखेटगा मुद्दा दशा स्यात्फलदा स्वपाके ॥ जन्मनक्षत्रसंख्या युक्त दोहीन गताब्द को नौ से भाग देकर जो शेष बचे क्रम से वर्ष पर वह मुद्दादशेश्वर होता है ॥ (जैसा) गताब्द १ जन्मर्क्ष अश्लेष की संख्या ९ युक्त १० दो२ हीन ८ को नौ ९ से शेष भी यही रहा । क्रम से केतुकी प्रथम मुद्दादशा है ॥

(मुद्दादशा की दिन) स्युर्दशादिवसास्तेषां धृतिस्त्रिंशंच्च मूर्छनाः । वेदेषवो नागकृता मुन्यक्षाः क्षितिसायकाः ॥ मूर्छनाः षष्टिरेताभ्यो द्वादशांशेन मासजाः ॥

(मुद्दान्तर्दशा) वेदा नागाः शराः सप्त दिग्रसाऽङ्कु-

शरांशर्सा: । सूर्यादीनां च गुणकास्तैर्निघ्ना स्वदशास्वपि ॥ षष्ट्याप्ताऽन्तर्दशा तस्य जायतेऽतिपरिस्फुटा । ग्रह की मुद्दादशा के दिन अपने २ गुणक से गुण कर साठ से भाग देकर दिनादिक अन्तर्दशा सूर्यादि ग्रहों के क्रम से हुगी । चक्र में स्फुट है ॥

(मुन्था) स्वजन्मलग्नं रवितष्टयातशरद्युतं सा भमुखेत्थिहा स्यात् ॥ बाराह से गताब्द १, को भाग देकर शेष १ जन्मलग्न ८ । २७ । १३ । ८ को युक्त कर के हुवा राशि आदि मुन्थालग्न ॥ (मुन्थाफल योगों से) मुथहाधिपतिः षष्ठोऽष्टमगो वा द्वादशश्चतुर्थश्च । अस्तमितो वक्री वा क्रूरदृशा वीक्षितो युतः क्रूरैः ॥ क्रूराच्चतुर्थसप्तमसंस्थः क्रूरेणैव विजितः । भव्यो न भवति वर्षे चाष्टमभवनाधिपेन युग्दृष्टः ॥

क्रूरदृशा मरणसमं कष्टं योगद्वयेन मरणकरः ॥

जब मुन्थेश अष्टमभावेश्वर के युक्त वा क्रूरदृष्टि से देखा हुआ हो, तब इस योग पर मरणतुल्य दुःख देता है ॥ जब मुन्थेश षष्ठाष्टमगतत्व आदि योग युक्त भी होवे, तब दोनों योगों के होने पर मारेगा ॥ याने मुन्थेशदशा में अष्टमाधाशीन्तरदशा के समय पर मृत्यु कहना चाहिये ॥ (और भी) मुथहाधिपतिः षष्ठाऽष्टमाऽस्ताऽन्त्यगतोऽस्तगः । वक्रो वा निजधातूत्थव्याधिं दद्याद्दशासु च ॥ मुथहाधिपतिः केन्द्रे स्वोच्चमित्रस्वराशिगः । करोति विविधाऽर्थाप्तिं महत्सौख्यं विशेषतः ॥ दशमे चाये पुण्ये स्वामित्वकरी नृणां भवेन्मुथहा । लग्नाद्द्वितीयपञ्चमसहजे चोपक्रमाद्धनं दत्ते ॥ लग्नात्षष्ठचतुर्थद्वादशसप्तमाष्टगा नेष्टा ॥

(अब भावों का फल)

१आरोग्यं कायपुष्टिं च मनःशान्तिं नृपात्सुखम् । कीर्तिं शत्रुक्षयं कुर्यात्तनुस्था मुथहा नृणाम् । मिष्टा२शनं धनप्राप्तिं स्वेष्टलाभं रिपुक्षयम् । स्ववर्गसुखदं कुर्याद्धनस्था मुथहा सदा ॥ म३होद्यमी कार्यसिद्धिप्रापकोऽतिसुखास्पदः । सर्वोपकारी च भवेत्तृतीये मुथहा यदा ॥ रोग४युक्तं कृशदेहं निरुद्यमयुतं नरम् । गुप्तभयं शत्रुभीतं कुर्यान्मुन्था चतुर्थगा ॥ सद्बु५द्धिं धर्मवृद्धिं च यशः पुत्रादिभाजनम् । राजमानास्पदं दद्यान्नरं मुन्था सुतस्थिता ॥ रि६पुचौराऽमयग्रस्तं कार्यहीनं प्रमादिनम् । व्यसनाग्रस्तहृदयं कुर्यान्मुन्था रिपुस्थिता ॥ रोग७पीडां मनोमोहं कलत्रादिभयं व्यथाम् । करोति धनधीनाशं

मुन्था सप्तमगा नृणाम् ॥ दुष्टबुद्धिं कान्तिनाशं शत्रुभीतिं धनक्षयम् । चौरादिदुष्टभीतिं च मुन्था च निधने स्थिता ॥ भाग्योदयं धर्मवृद्धिं नृपमानं धनागमम् । स्ववर्गसन्तोषसुखं दद्यान्मुन्था च भाग्यगा ॥ स्वजनधर्मभाग्यार्थजन्यं सौख्यं सुचित्तताम् । यशःप्रवृद्धिं तनुते कर्मस्था मुथहा नृणाम् ॥ मनोरथाप्तिं स्वजनैः प्रीतिं राजकुलात्सुखम् । विशेषतोऽर्थलाभं वै कुरुते लाभगेत्थिहा ॥ विविधां रोगवृद्धिं च कार्पण्यं स्वजनैः सह । विवादं द्रव्यनाशं च दद्यान्मुन्था व्ययस्थिता ॥ (वर्षेश्वर सूर्य का फल) सूर्येऽब्दपे बालिनि राज्यसुखात्मजार्थलाभः कुलोचितभवः परिवारसौख्यम् । पुष्टिं यशोगृहसुखं विविधा प्रतिष्ठा शत्रुर्विनश्यति फलं निज-

खेटयुक्त्या ॥ (अर्थ) वर्षेश जन्मकुण्डली में सत्स्थान में शुभग्रह दृष्ट हो, तो शुभफल सम्पूर्ण देवे। अन्यथा होने पर फल भी विपरीत होवे, और मिश्र होने पर फल भी मिश्र होवे। मध्ये[2] रवौ फलमिदं निखिलं तु मध्यं स्वल्पं सुखं स्वजनतोपि विवादमाहुः। स्थानच्युतिर्न च सुखकृशतापि देहे भीतिर्नृपान्मुथाशिलो न शुभेन चेत्स्यात् ॥ सूर्ये[3] बलेन रहितेऽब्दपतौ विदेशे यानं धनक्षयशुचोऽरिभयं च दत्ते। लोकापवादभयमुग्ररुजोऽतिदुःखं पित्रादिभिश्च न सुखं सुतमित्रभीतिः ॥ (चन्द्र का) वीर्यान्विते[1] शशिनि वित्तकलत्रपुत्रमित्रालयादिविविधं सुखमाहुरार्याः। स्रग्गन्धमौक्तिकदुग्गूलसुखानुभूतिर्लाभः कुलोचितपदस्य नृपैः

सखिलम् ॥ वर्षाधिपे शशिनि मध्यबले फलानि मध्यान्यमूनि रिपुता सुतमित्रवर्गे । स्थानान्तरे गतिरथो कृशता शरीरे श्लेष्मोद्भवश्च यदि पापकृते सराफः ॥ नष्टेऽब्दपे शशिनि शीतकफादिरोगश्चौरादिभिः स्वजनविग्रहमप्युशन्ति । दूरे गतिः सुतकलत्रसुखात्ययश्च स्यान्मृत्युतुल्यमऽतिहीनबले शशाङ्के ॥ (भौमका) भौमेऽब्दपे बलिनि कीर्तिजयाऽरिनाशः सेनाधिपत्वरणनायकता प्रतिष्ठा । लाभः कुलोचितधनस्य नमस्यताऽपि लोकेषु मित्रसुतवित्तकलत्रसौख्यम् ॥ मध्येऽब्दपेऽवनिसुते रुधिरस्रुतिश्च कोपोऽधिको विविधशस्त्रहतिक्षतानि । स्वामित्वमाप्तगणतो

चलनैरत्वं मध्यं सुखं निखिलमुक्तफलं विचिन्त्यम् ॥

हीनेऽब्दपेऽसृजि भयं रिपुतस्करादेर्लोकापवादभयमात्मधिया विनाशः । कार्यस्य विघ्नगऽतिरोगभयं विदेशयानं त्वयोऽपनयतो गुरुदृष्ट्यऽभावे ॥ (बुध का) वर्षाधिपे बलिनि चन्द्रसुतेऽतिसौख्यं सेवाधनं लिखनतः पठनादिना वा । स्त्रीमित्रसौख्यमऽतुलं सुतत‌श्च नूनं वाणिज्यतो धनसमागमनं विलासः ॥ मध्यश्च सोमतनयो निजवाक्यदोषात्सर्वार्थहानिमशुभं प्रकरोत्यऽनर्थम् । स्त्रीपुत्रमित्रकलहं सुखमपि चाल्पं वैरोदयं नृपजनात्स्वजनाच्च तद्वत् ॥ नष्टे बुधे नृपभयोऽनृतसाक्षिता च क्लेशोदयः स्वजनतोऽर्थलयो विवादः । चौराद्भयं हृदि गलाऽमयकृत्स्वनेत्रपीडा भवेन्निखिलमन्यग्रहैश्च दृष्टे ॥ (जीव का) जीवेऽब्दपे बलयुते

परिवारसौख्यं धर्मो गुणग्रहिलता धनकीर्तिपुत्रैः । विश्वासिता जगति सन्मतिविक्रमाप्तिर्लाभो निधेर्नृपतिगौरवमऽप्यऽरिघ्नम् ॥ २ नाकेश्वरस्य सचिवे खलु मध्यवीर्ये लोकैर्विरोधमऽशुभं प्रकरोति भूपात् । वैरोदयं स्वजनतश्च परैर्विवादं कुर्यात्कुशलमऽतिचौरभयं सदाऽसौ ॥ ३ निन्द्ये गुरौ खलु भवेन्नृपतोऽर्थनाशो धर्माऽर्थहान्यऽसुखबन्धुविरोधपीडा । पादाऽक्षिगुल्फजठरे जघने च नृणां वाताऽर्तिकृत्परिभवं तनुसंक्षयं च ॥ (शुक्र का) १ शुक्रेऽब्दपे बलिनि नीरुजता विलासः सद्वस्त्ररत्नमधुराशनभोगतोषाः । क्षेमप्रतापविजयो वनिताविलासो हास्यं नृपाश्रयवशेन धनं सुखं च ॥ २ मध्ये नृपात्स्वजनतस्त्वरितो विरोधं श्लेष्मा-

ऽर्तिकृच्च सुतदारभयं च कष्टम् । कार्यार्थहानिमऽपि मोहरुजोदयं च कुर्यान्न सौख्यमिह स्वीयदशाप्रवेशे ॥ निन्द्ये सितेऽखिलजनात्कलहो नितान्तं स्याद्वैरिता नृपलनादऽसुखं च कष्टम् । सौख्यार्थहानिरतिशोक-भयं विवादो दग्धे स्वपाकविषयेऽमितसंचयं स्यात् ॥ (शनि का) मन्देऽब्दपे बलिनि नूतनभूमित्रेशमत्ते-त्राप्तिरऽर्थनिचयो यवनावनीशात् । आरामनिर्मिति-जलाशयतश्च सौख्यं पुष्टिः कुलोचितपदाप्तिगुणाश्च तद्वत् ॥ मध्यः शनिः स्वजनराजजनाद्विरोधं वाता-र्तिकृज्जठरगुल्फगले च नेत्रे । दारिद्र्यदुःखपरिपीडन-मऽत्र कुर्याद्वैराजमऽर्थपरिहानिसुहृद्विरोधम् ॥ निन्द्ये तु सर्वमऽधमं तु सुहृद्विपत्तिः कष्टं क्रियाविफलता-

ऽनिलरुग्विकाराः । कार्यार्थहानिरऽथपुत्रसुहृद्विपत्ति
दग्धेऽर्कजे भवति दंष्ट्रिभयं च मृत्युः ॥ (विशेष है)
सद्मोच्चगेषु परिपूर्णफलं खगेषु हृद्दात्रिभागकनवांशगतेषु
मध्यम् । नीचारिवेश्मसहितेषु च दग्धवीर्यमऽस्तादि-
गेषु खलु नष्टफलं समं तत् ॥ क्रूराक्रान्तः क्रूरयुतः
क्रूरदृष्टश्च यो ग्रहः । विरश्मितां प्रपन्नश्च स विनष्टो
बुधैः स्मृतः ॥

मुद्दादशेशों की अवधि वर्षादिक का चक्र

सू	चं	भौ	रा	जी	श	बु	के	शु
०	०	०	०	०	०	०	०	०
०	१	०	१	१	१	१	०	२
१८	०	२१	२४	१८	२७	२१	२१	०

वर्ष पर स्फुट मुद्दादशा का चक्र

	के	शु	सू	चं	भौ	रा	जी	श	बु
	०	०	०	०	०	०	०	०	०
	०	२	०	१	०	१	१	१	१
	२१	०	१८	०	२१	२४	१८	२७	२१
१३	१३	१३	१३	१३	१३	१३	१३	१३	१४
०	१	३	३	४	५	७	८	१०	०
१७	८	८	२६	२६	१७	११	२६	२६	१७

(ग्रहों का फल लिखने की रीति) संवत् १३ मेषांशाः १७ केतुदशाप्रवेशः मास० दिन २१ फलम् । वर्षकुण्डली में लग्नस्थित केतु है उस का श्लोक "देहे मरुत्कृता पीडा" इह लिखना ॥ ऐसा ही और ग्रहों को भी लिखना ॥ (ग्रहों का भावफल, प्रथम सूर्य का)

बहुचिन्ता तथोद्वेगं शिरोऽक्षिमुखपीडनम् । बहुरोषोऽङ्गनापीडा वर्षादौ लग्नगे रवौ ॥ रिपुराजाऽनलैश्चौरैर्विवादं त्रिभवव्ययम् । कुटुम्बकलहं वर्षे द्वितीयो भास्करो यदि ॥ राजमानं तथाऽऽरोग्यं धनलाभं रिपुक्षयम् । सर्वोपक्रमसिद्धिश्च वर्षादौ तृतीये रवौ ॥ इष्टस्वजनविद्वेषं भयं भूपालसम्भवम् । चतुष्पदमनुष्याणां भयं सूर्ये चतुर्थगे ॥ पुत्ररुक्कामिनीकष्टं विवादं चातिमूढता । द्रव्यनाशः स्वेष्टदुःखं वर्षादौ पञ्चमे रवौ ॥ अन्नागमं तथैश्वर्यं राजमानं रिपुक्षयम् । सौख्यं कलत्रपुत्रादौ वर्षादौ षष्ठगे रवौ ॥ वस्तिचक्षुःशिरोरोगैः स्त्रीपीडा नगराटनम् । चित्तोद्वेगं वैमनस्यं वर्षादौ सप्तमे रवौ ॥ चक्षूरुग्धनहानिः

स्याद्बहुपीडा कलेवरे । पित्तजा विषभूपालव्यालजाऽ-
व्देऽष्टमे रवौ ॥ [९]भार्यापुत्रविवादं च मतिं धर्मक्रिया-
दिषु । चित्तोद्वेगाकुलं नित्यं वर्षादौ नवमे रवौ ॥
[१०]राजमानादिजं सौख्यं विद्याप्राप्तेः सुखं धनम् ।
प्रस्थानं वंशविस्तारं वर्षादौ दशमे रवौ ॥ [११]वाजिष्ट-
षादिद्रव्याप्तिः प्रमोदः स्वेष्टवर्गतः । नृपप्रसादमारोग्यं
वर्षादौ लाभगे रवौ ॥ [१२]दृष्टिरुग्द्रव्यहानिश्च विद्वेषो
बन्धुवर्गतः । देहे पित्तोद्भवा पीडा वर्षादौ व्ययगे
रवौ ॥ (चन्द्र का) [१]वेदनाऽक्षिविकारौ च कासश्वा-
सादिपीडनम् । देहे कफोद्भवा पीडा वर्षादौ लग्नगे
विधौ ॥ [२]इष्टस्थानगतं सौख्यं धनाप्तिः श्वेतवस्तुतः ।
शरीरे परमारोग्यं वर्षादौ द्वितीये विधौ ॥ [३]सुखं

लाभं जयं पुंसां धनागमं तु विक्रमात् । धर्मे बुद्धि-
र्भवेत्पुंसां वर्षादौ तृतीये विधौ ॥ सुहृद्बन्धुकलत्रादि-
सौख्यं चातिधनागमम् । गोमहिष्यादिप्राप्तिश्च वर्षादौ
तुर्यगे विधौ ॥ स्त्रीसुखं विजयं मानं राजपूजा धना-
गमम् । सुबुद्धिः सन्ततेः प्राप्तिर्वर्षादौ पञ्चमे विधौ ॥
वातश्लेश्मादिजा पीडा विद्वेषो बान्धवैः सह । नृप-
चौरोद्भवं दुःखं वर्षादौ षष्ठगे विधौ ॥ स्त्रीसुखं
नृपतेर्मानं लाभं ग्रामान्तराद्भवेत् । वाणिज्याज्जलमा-
र्गाच्च वर्षादौ सप्तमे विधौ । अष्टमस्थोऽल्पसन्तोषो द्रव्य-
नाशमुपद्रवः । श्लेष्मचक्षुर्विकारांश्च वर्षादौ कुरुते विधुः ॥
नवमे धर्मलब्धिश्च मनःसन्तोषमेव च । यशोवृद्धिर्नृपा-
न्मानो वर्षादौ चन्द्रमा यदि ॥ द्रव्यागमं शत्रुनाशो

रोगनाशं विशेषतः । प्रतिष्ठा कीर्तिलाभश्च वर्षादौ दशमे विधौ ॥ [11] वस्त्रपुत्रादिकप्राप्तिर्धनं स्वालयसम्भवम् । श्वेतक्रियाणकाल्लाभो वर्षे लाभस्थिते विधौ ॥ [12] द्रव्यक्षयं क्षुधाल्पत्वं नेत्ररुक्कलहं गृहे । वर्षकाले व्ययस्थाने चन्द्रः कुर्यादिदं फलम् ॥ (भौम का) मूर्धवक्त्रादिरोगाश्च कलहं च धनक्षयम् । रक्तपित्तप्रकोपश्च कुरुते लग्नगः कुजः ॥ वह्निचौरनृपादिभ्यो भयं वा विभवव्ययम् । दृशोरुक्कामिनीकष्टं धनस्थे धरणीसुते ॥ [3] नृपमानं धनप्राप्तिर्द्रव्यनाशो निरामयम् । गेहे महोत्सवो नित्यं तृतीये भूमिनन्दने ॥ देशाटनं सकष्टं च हृदि दुःखं सखक्षयम् । कुटुम्बकलहं चैव चतुर्थे भूमिनन्दने॥ पुत्रार्तिः कामिनीकष्टं व्याधिश्चैवोदरे नृणाम्।

दुर्मतिः स्वजनैर्वैरं पञ्चमे भूमिनन्दने ॥ ईष्टस्वजनतः
सौख्यं धनलाभं रिपुक्षयम् । प्रमोदः स्वमतेर्माणां षष्ठस्था-
नगते कुजे ॥ जायाकष्टं तथा हानिः पीडा ह्यात्मन
एव च । देशभ्रंशोद्भवां भीतिं कुर्याद्भौमस्तु सप्तमे ॥
रक्तपित्तप्रकोपश्च महापीडा धनव्ययम् । विपत्तिरिष्टव-
र्गस्य ह्यष्टमस्थे धरासुते ॥ पापलब्धिर्भवेत्पुंसामुद्वेगं विभ-
वव्ययम् । कलहं बन्धुवर्गैश्च नवमे धरणीसुते ॥ तेजोवृद्धि-
र्व्यापारं धनलाभश्च प्रसादं भूमिपालतः । जायापुत्रसुहृत्सौख्यं
स्तथाऽरोग्यं दशमस्थे धरासुते ॥ शत्रुनाशं नृपात्सौख्यं लाभगे
प्रतापो विभवागमः । भूमिनन्दने ॥ दृशोरोगं वपुःपीडा धननाशं नृपाद्भ-
यम् । सुतजायादिजं दुःखं हायने द्वादशे कुजे ॥

(राहु व केतु का) देहे मरुत्कृता पीडा कलहं विभ-व्ययम् । जायापुत्रादिजं कष्टं राहौ (केतौ) वर्षे विलग्नगे॥ [२]धनव्ययमनारोग्यं चिन्ता वस्त्यादिपीडनम् । वक्त्र-लोचनपीडा च राहौ (केतौ) वर्षे धनस्थिते ॥ [३]राजमानं तथैश्वर्यमारोग्यं विभवागमम् । शत्रुक्षयः सुहृत्सौख्यं राहौ (केतौ) वर्षे तृतीयगे ॥ [४]चिन्ता-दुःखं प्रवासश्च विवादः स्वजनैः सह । चतुष्पदः क्षयं यान्ति राहौ (केतौ) वर्षे चतुर्थगे ॥ [५]पुत्रसौख्यं सुतप्राप्तिर्दुर्मतिर्वैरिविग्रहः । नियतं जठरे पीडा राहौ (केतौ) पञ्चमगे सदा ॥ [६]नृपप्रसादमारोग्यं धनलाभो रिपुक्षयम् । कलत्रपुत्रजं सौख्यं राहौ (केतौ) षष्ठे तु हायने ॥ [७]प्रवासः पीडनं चाङ्गे स्त्रीकष्टं पवनो-

स्थरुक् । कटिवस्तौ भवेत्पीडा राहौ (केतौ) जाया-
स्थिते भवेत् ॥ धनव्ययमऽनारोग्यं विद्वेषो बन्धुभिः सह ।
स्त्रीकष्टं च प्रवासं च राहुः (केतुः) कुर्यात्तथाऽष्टमे ॥
विद्वेषश्च वपुःपीडा दैन्यं राजादिपीडनम् । धर्मकार्ये
विलम्बः स्यात् राहौ (केतौ) वर्षे तु धर्मगे ॥
[१०]व्यापाराद्धनहानिश्च भयं भूपालसम्भवम् । मुखे दैन्यं
प्रवासश्च राहौ (केतौ) वर्षे तु कर्मगे ॥ [११]शरीरारोग्य-
मैश्वर्यं स्त्रीसुखं विभवागमः । सङ्कीर्णवर्णतो लाभो
राहु (केतु) र्लाभगतो यदा ॥ [१२]धनव्ययं च कष्टं च
राजपीडा रिपोर्भयम् । जायापीडा भवेन्नित्यं राहौ
(केतौ) वर्षे तु द्वादशे ॥ (जीव का) [१]सौख्यं पुत्र-
कलत्रादेर्वपुरारोग्यसम्मतिः । लाभं सेवासुखं भूपान्मानं

लग्नगते गुरौ ॥ धनलाभं तथारोग्यं प्रमोदो बन्धुवर्गतः । प्रचण्डसदृशैर्भोगैर्देवेज्ये धनगे भवेत् ॥ लाभालाभौ सुखं दुःखं शत्रुमित्रैश्च सङ्गमम् । नृणां स्त्रीपक्षतः सौख्यं सेवायाश्च सुखे गुरौ ॥ जायापुत्रसुहृत्सौख्यं नृपमानं धनागमम् । भूमिवाहनविद्याप्तिश्चतुर्थे हायने गुरौ ॥ सुबुद्धिः सन्ततेः प्राप्तिः सौख्यं लाभो भवेन्नृणाम् । इष्टमित्रकृतं सौख्यं पञ्चमस्थे सुरार्चिते ॥ रिपुवृद्धिमनारोग्यं धननाशं बलक्षयम् । इष्टस्वजनविद्वेषं षष्ठे देवपुरोहिते ॥ वाणिज्याद्व्यवहाराच्च मार्गाच्चैव धनागमम् । स्त्रीसुखं राजसम्मानं सप्तमे सुरमन्त्रिणि ॥ धनव्ययमनारोग्यं जयापुत्रादिपीडनम् । वियोगं च विवादं च ह्यष्टमे देवपूजिते ॥

धनलाभो राजमानं धर्मकार्यं भवेत्सदा। प्राप्नोति वित्तधान्भोगान्देवेज्ये नवमस्थिते ॥ [१]संत्कीर्तिर्भूभृतो मानं धनलाभं महत्सुखम्। गेहे महोत्सवं नित्यं देवेज्ये दशमे यदि ॥ [११]आयुरारोग्यमैश्वर्यं जायापत्यसुहृत्सुखम्। नृणां चतुष्पदप्राप्तिर्लाभस्थाने यदा गुरुः ॥ [१२]स्वजनैर्विग्रहं दुःखं क्षयोत्पत्तिर्धनव्ययः। प्रवासो नृपतेर्भीतिर्देवेज्ये व्ययसंस्थिते ॥ (शनि का) [१]कफमारुतकोपं च शिरोजठरपीडनम्। इष्टद्वेषं वक्त्रपीडा वर्षे लग्नगते शनौ ॥ पीडा [२]वक्त्रे तथा नेत्रे धननाशो नृपाद्भयम्। पुत्रजायादिजं कष्टं द्वितीये रविनन्दने ॥ [३]सर्वदुःखादिमोक्षश्च राजमानं धनागमम्। वर्षकाले यदा सौरिस्तृतीये कुरुते नृणाम् ॥ [४]मातृपक्षैर्भवेत्कष्टं प्रवासं च

धनक्षयम् । असन्तोषो राजपीडा चतुर्थे रविनन्दने ॥ जायापत्यसुहृत्कष्टं दुष्टबुद्धिर्धनक्षयम् । उदरे वातपीडा च पञ्चमे रविनन्दने ॥ देहसौख्यं देहवृद्धिः प्रसादो भूमिपालतः । स्त्रीपुत्रजनितं सौख्यं वर्षे षष्टगते शनौ ॥ सततं गमने प्रीतिः सुहृत्कष्टं धनक्षयम् । प्रवासः शत्रुतो भीतिः सप्तमे सूर्यनन्दने ॥ रोगपीडा महाव्याधिः पुत्रजायादिपीडनम् । व्यसनं द्रव्यहानिश्च हायनेऽष्टमगे शनौ ॥ जायापुत्रसुहृत्कष्टं धननाशं नृपाद्भयम् । दुर्बुद्धिः पापबुद्धिश्च नवमे भास्करात्मजे ॥ व्यापाराद्धनहानिश्च भयं भूपालसम्भवम् । मुखे दैन्यं प्रवासश्च दशमे रविनन्दने ॥ द्रव्यागमं तथैश्वर्यमारोग्यं योषितां सुखम् । शूरस्वाम्याश्रितो लाभो वर्षे

लाभगते शनौ ॥ [12]पदान्तिहृदये पीडा नृविनाशं नृपा-
द्भयम् । कलहं बन्धुवर्गादौ कुर्यान्मन्दो व्ययस्थितः ॥
(बुध का) [1]देहे सौख्यं धियो वृद्धिर्नृपमानं धना-
गमम् । तेजोधैर्यातिवृद्धिश्च वर्षे सौम्ये विलग्नगे ॥
[2]शरीरे नीरुजं नित्यं द्रव्यलाभो नृणां भवेत् । इष्ट-
स्वजनजं सौख्यं रौहिणीये कुटुम्बगे ॥ [3]वर्षकाले यदा
चान्द्रिः सहजे कुरुते नृणाम् । स्ववर्गाल्पसुखं लाभं
सुहृद्बन्धुसमागमम् ॥ [4]मित्रस्त्रीबन्धुजं सौख्यं चतुरङ्घ्रि-
धनागमम् । वर्षे चतुर्थगश्चान्द्रिः कुरुते नियतं नृणाम् ॥
[5]जायापुत्रसुहृत्सौख्यं मानं भूपालसम्भवम् । प्राप्यते
सम्मतिः पुंसां पञ्चमे शशिनन्दने ॥ [6]शत्रुपक्षविवृद्धिश्च
विवादं स्वजनैः सह । शरीरे रोगजां पीडां कुर्या-

त्सौम्यस्तु षष्ठगः ॥ मार्गाल्लाभोऽङ्गनासौख्यं वाणिज्याच्च धनागमम् । चन्द्रजः कुरुते नित्यं हायने सप्तमे नृणाम् ॥ लाभं सौख्यं प्रमोदं च राजपूजां रिपुक्षयम् । विदधाति नृणां वर्षे सौम्यो मृत्युस्थितो यदा ॥ धर्मबुद्धिस्तथोद्वेगं दैन्यं जायादिपीडनम् । चन्द्रजः कुरुते वर्षे नवमस्थो यदा नृणाम् ॥ वाणिज्याद्राजवर्गाच्च धनलाभं सुहृत्सुखम् । बलं कान्तिविवृद्धिश्च हायने दशमे बुधः ॥ द्रव्यलाभं तथाऽरोग्यं प्रभुप्रीतिविवर्धनम् । शुभ्रक्रियाणकाल्लाभो लाभस्थाने यदा बुधः ॥ स्वल्पलाभमनारोग्यं बहुव्ययं नृपाद्भयम् । स्ववर्गे कलहं नित्यं कुर्यात्सौम्यस्तु रिष्फगः ॥

(शुक्र का) सौख्यं लाभं प्रमोदं च कुलवृद्धिर्भवेन्नृ-

णाम् । लाभं भूमिपतेर्दत्ते दैत्येज्यो लग्नगो यदा ॥ धनलाभं सुहृद्वृद्धिः स्त्रीसुखं शत्रुसंक्षयम् । कान्तिवृद्धिर्नृणां देहे दैत्येज्यो धनगो यदा ॥ तृतीयेऽल्पसुखं पुंसां धनव्ययमुपद्रवम् । विवादं स्वजनैः सार्धं वर्षे दैत्यपुरोहिते ॥ नृपमानमथैश्वर्यमारोग्यं विभवागमम् । भूमिवाहनविद्याप्तिर्हायने हिबुके भृगौ ॥ जायापुत्रादिजं सौख्यं सुबुद्धिं विभवागमम् । विद्याविज्ञानकौशल्यं पञ्चमे भृगुजे नृणाम् ॥ वातश्लेष्मोद्भवा पीडा क्षयोत्पत्तिर्धनक्षयः । महाभयं गृहे कष्टं वर्षे षष्टगते भृगौ ॥ दयितापुत्रजं सौख्यं वाणिज्याद्विभवागमः । मार्गाल्लाभं प्रमोदं च सप्तमे भृगुजे नृणाम् ॥ अल्पभाग्यमनारोग्यं कलहं मित्रवर्गतः । धर्मनाशं प्रवासं

च भृगुपुत्रेऽष्टमस्थिते ॥ शरीरे चैवमारोग्यं सुबुद्धिर्विभवागमम् । जायापुत्रादिजं सौख्यं नवमे भृगुजे भवेत् ॥ नृपमानं सुहृत्सौख्यं धनलाभं रिपुक्षयम् । सर्वारम्भाः प्रसिद्ध्यन्ति दैत्येज्ये दशमे भवेत् ॥ जलमार्गाद्धनप्राप्तिस्तथा शुभ्रक्रियागणकात् । प्रियागमस्तथारोग्यं लाभगे भृगुनन्दने ॥ मित्रस्वजनविद्वेषः सन्मार्गे विभवव्ययः । निःसङ्गत्वं प्रवासश्च द्वादशे भृगुजे नृणाम् ॥

इति वर्षखण्डं द्वितीयम् ॥ २ ॥

(अथ तीसरा जातकखण्ड)

(जन्मेष्टशुद्धि के लिये गर्भाधान लाना) कहाभी ॥

विज्ञायते ज्ञानिभिरत्र पुंसां शुभाऽशुभं जन्मफलं विलग्नात् । तदुच्यते ताजिकनायकोक्ता निषेककाला-

दिह तस्य शुद्धिः ॥ १ ॥ व्यब्जाङ्गाद्व्यङ्गचन्द्राच्च गृह्णीयाद्राशितः फलम् । हीनं युक्तं भागफलैर्गणो गर्भे भवेत्तिथिः ॥ जन्मगर्भीयलग्नाऽब्जसमत्वं चेष्टशुद्धिता ॥ २ ॥ विचन्द्रलग्न व विलग्नचन्द्र के राशियों के फल से गण व तिथियों के फल से अंशफल कम व अधिक कर के गर्भ में स्थिति का अहर्गण व तिथियां होते हैं ॥

उपर गणफल नीचे तिथिफल (कोष्ट राशियों से रखना)

०	१	२	३	४	५	६	७	८	९	१०	११
२७३ १३	२७० ५६	२६८ ३९	२६६ २२	२६४ ६	२६१ ४९	२५९ ३२	२५७ १६	२५४ ५९	२५२ ४२	२५० २६	२४८ ९
२५० ०	२५२ १८	२५४ ३७	२५६ ५५	२५९ १४	२६१ ३२	२६३ ५२	२६६ १०	२६८ २८	२७० ४६	२७३ ५	२७५ २३

१७४(अशंफलज्या गणफल को जोडना तिथिफलको काटना)

०	१	२	३	४	५	६	७	८	९	१०
०	०	०	०	०	०	०	०	०	०	०
४	९	१३	१८	२३	२७	३२	३६	४१	४६	५०
११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१
०	१	१	१	१	१	१	१	१	१	१
५५	०	४	९	१३	१८	२३	२७	३२	३६	४१
२२	२३	२४	२५	२६	२७	२८	२९			
१	१	१	२	२	२	२	२	गणको ऋण		
४६	५०	५५	०	४	९	१३	१८	तिथिको धन		

उन से आधानकालिक लग्न व चन्द्र की जन्मकालिक चन्द्र व लग्न की समानता ही जन्मेष्ट की शुद्धि होती हैं ॥ (जैसा) संवत् ५००७ श्रावदि ४ रवौ सूपूभाप्र ७। ४२ चप्र १०। ३३ अतिगण्डप्र ६। ४५ मीचंगि २५। १७ चरः रार्धं १२। ५५ कर्कांशाः १४ उदयादिष्ट ३०। ३५ ज्योतिषीशम्भूनाथजन्म (इष्टशुद्धि के वास्ते गर्भाधान लाना) शाकः १८५३ करणं ४११ चक्र ३७ अधिमास ४ ऊनाह २६ अहर्गण १६४८ अयनांश ०। २३। २६। १५ सूर्यस्फु ३। १६। ३। ४ चन्द्रस्फु ११। १। १०। ६ लग्न ८। २२। ६। ४६ (गण के वास्ते) विचन्द्र-लग्न ६। २०। ५६। ४० के राशियों ६ से उपर साराशि में गणफल २५२। ४२ को भाग २० फल १। ३६ कम कर के हुआ २५१। ६ गर्भ में स्थिति का गण, जन्माहर्गण १६४८। ३० से काट कर हुवा, चन्द्रवार पर गर्भा-

धान का द्युगण १३९७ । २४ ॥ (तिथि के वास्ते) विलग्न-चन्द्र २ । ६ । ३ । २० के राशियां २ से सरणि में नीचे तिथे फल २५४ । ३७ को भाग ६ फल ० । ४६ जोड के हुई, २५५ । २३ गर्भ में स्थिति की तिथियां , मासादि ८ । १५ । २३ गर्भाधान तक जन्मकाल से बीच में अधिमास होने के कारण सैक शुक्लपक्षादि सावणमान से गिनती कर के वैशाख से सावण तक जन्ममासादिकों ४ । १८ । ३१ से काट के हुई ८ । ३ । ८ वर्तमान अष्टम मगरमास की शुक्लतृतीया गत और वर्तमान चतुर्थी तिथी है । (अब) संवत् ५००६ के पत्री से मार्गशुदि चतुर्थ्यां चन्द्रे चंपूषांदि २४ । ५५ चदि २३ । १६ शूदि २ । २८ मंचंरा १६ । २ विष्टिशे ४ । २१ दि २३ । १६ उन्मूलं पूर्वागताऽहर्गण १३६७ से प्राभातिकसूस्प ७ । ७ । ५५ ३७ अयनों ० । २३ । २६ । ३५ से युक्त ८ । १ । २५

१२ के भोग्यांशों २८ । ३४ । ४८ का भोग्यकाल ३३० जन्मचन्द्र ११ । १ । १० । ७ सायन ११ । २४ । ३६ । ४२ कल्पितलग्न का भुक्तकाल १६३ मध्यस्थ मकर २६६ कुम्भ २३३ इन का योग १०२२ घट्यात्मक १७ । २ हुवा आधान का इष्ट, इस पर । सूस्फु ७ । ८ । १२ । ५५ चस्फु ८ । २५ । २ । ३१ लग्न ११ । ० । ५३ । ३ (नियम है) आधानचन्द्र जन्मलग्न से अधिक हो, तो आगतफल जन्मेष्ट को जोडना, कम हो तो, काटना । यहां जन्मलग्न ८ । २२ । ६ । ४६ आधानचंद्र ८ । २५ । २ । ३१ का अन्तर ० । २ । ५५ । ४२ अधिक है, इस लिये जोडना । सायनचन्द्र (कल्पितलग्न) की राशि ६ मकर के तीन अंशों का फल ३० जन्मेष्ट ३० । ३५ को अधिक कर होवा शुद्ध जन्मेष्टकाल ३१ । ५ है । (क्योंकि) इस पर जन्मचन्द्र ११ । १ । १० । १४ व

आधानलग्न ११ । १ । ७ । ११ और आधानचन्द्र ८ । २५ । १ । ५३ व जन्मलग्न ८ । १५ । ६ । ४६ को भी समता होती है (इति आधान लानी की रीति) ॥ (द्वादशभावो की संज्ञा) तनुर्धनं सहजं च सुहृत्पुत्रो रिपुर्वधूः । मृत्युश्च धर्मः कर्माऽयो व्ययोभावाश्च द्वादश ॥

संवत् ५००७ श्रावदि ४ रवौ शुद्धेष्टकाल ३१ । ५ पर सूर्यादिस्पष्ट सू ३ । १६ । ३ । ३२ चं ११ । १ । १० । १४ भौ ५ । ६ । ३१ । २१ बुध ४ । ७ । ४७ । १६ जी ३ । १२ । ३६ । ११ शु ३ । ७ । १७ । ५१ श ८ । २३ । २० । ३१ रा ११ । १५ । २३ । २८ लं ८ । २५ । ६ । ५० दशमलं ६ । १४ । २६ । ४७ । जन्मचंक्र ॥ धंलेश मीचंरा कर्सूजीशु सिंबु कुंभौके भावचंक्र । १ श ३ चंरा० ७ सू० जी० शु ८ बु० ६ भौके०

होराचक्र[२] । [१]कलंचंभौजीशुश , [२]सिंसूबु ॥

द्रेक्काणचक्र[३] । [१]सिंलंश [२]कंभौ [४]वृंसूजी [८]मीचं [१२]कंबुशु

सप्तांशचक्र[७] । [१]वृंलंश [५]कंचंबु [६]तुंजी [१०]कुंशु [१२]मेसूभौ

नवांशचक्र[९] । [१]वृंलंसूश [४]कुंभौ [८]मिबु [९]कंचं [११]कंशु [१२]तुंजी

द्वादशांशचक्र[१२] । [१]तुंलं [२]वृंभौबु [३]धंजी [४]मंसू [६]मीचं [१२]कंशुश

त्रिंशांशचक्र[३०] । [१]मिलंश [५]कंभौशु [९]कुंबु [१०]मीसूजी [१२]वृंचं

(बल के विचार विना जातक का फल न कह सकता है, इस लिये स्थान, दिक्, काल, निसर्ग, चेष्टा, दृष्टि से, छः प्रकार बल में (प्रथम) उच्च, सप्तवर्ग, युग्मायुग्म, केन्द्रादि, द्रेक्काण से (पञ्चधा) स्थान-बल में से उच्च व सप्तवर्गी का बल कहता है) नीचोनो भगणाच्च्युतः षडऽधिकः षड्हृत्तदोच्चं बलं, स्वर्क्ष-

ऽर्धं समभेऽष्टमस्त्रिचरणा मूलत्रिकोणे बलम् । मित्रच्च-ऽङ्घ्रिरऽधीष्टभे त्रय इभांशा वैरिभेऽष्ट्यंशको दन्तांशो-ऽध्यरिभे गृहाधिपवशात्खेटस्य सप्तैक्यजम् ॥

(उच्चबल) सूर्यस्पष्ट ३ । १६ । ३ । ३२ स्वनीच ६ । १० से हीन होवा ६ । ६ । ३ । ३२ छः से अधिक होने के कारण बाराह से ऊनित होवा २ । २३ । ५६ । २८ छः से लब्ध ० शेष २ साठ से गुणित १२० नीचले २३ । ५६ । २८ अंशात्मक होने के कारण दोगुणे फल ४७ ५२ । ५६ से युक्त १६७ । ५२ । ५६ छः से लब्ध २७ । शेष ५ साठ से गुणित ३०० नीचले ५२ । ५६ फल से युक्त ३५२ । ५६ छः से लब्ध ५८ शेष ४ साठ से गुणित २४० नीचले ५६ फलयुक्त २९६ छः से लब्ध ४९ शेष २ छोडना, लब्ध एकट्ठा ० । २७ । २८ । ४९ हुआ

सूर्य का उच्चबल, ऐसा औरों को भी उच्चबल बनाना॥ (सप्तवर्ग का बल) स्वगृह में एककला का आधा ३०।०' सम में अष्टमांश ७। ३० मूलत्रिकोण में तीन पाद ४५ मित्र में एकपाद १५ अधिमित्र में त्रिगुणा अष्टमांश २२। ३० शत्रु में सोलमा भाग ३। ४५ और अधिशत्रुगृह में बतीसमा भाग १।५२। ३० बल है परन्तु ग्रहों का बल "गृहाधिपवशात्" यानि जिस घर में ग्रह होवे, उस घर के स्वामी से सप्तवर्गी में बल रखना॥ (जैसा) जन्मकुण्डली में सूर्य कर्कट में है, उस का स्वामी चन्द्र मीन में है, मीन का स्वामी बृहस्पति चन्द्र का शत्रु है, इस लिये शत्रु का बल ३। ४५ आया है। ऐसा होरादिकों का भी बल रखना। एकट्ठा सप्तवर्गी बल होता है॥ यह पञ्चधामैत्रीचक्र से स्फुठ होता है॥

तत्रादौ (तात्कालिकशत्रुमित्र) अन्योन्यस्य धनव्यये

ऽर्यसहजव्ययांरबन्धुस्थिताः । तात्काले सुहृदः स्वतुङ्गभवनेप्येतेऽरयस्त्वन्यथा ॥ आपस में जन्मकुण्डली में २, ३, ४, १०, ११, १२ स्थानों में मित्र और स्थानों १, ५, ६, ७, ८, ९ में अपने उच्चराशि का भी स्वामी शत्रु हैं ॥ और पञ्चधा अधिमित्रादिचक्र भी नैसर्गिक व तात्कालिक मित्रादिचक्रों से कल्पना करना ॥ (नैसर्गिक) द्विधामैत्री, त्रिधामैत्री, और पञ्चधामैत्रीचक्र भी कर के सप्तवर्गी का बलचक्र करना ॥ अगले चक्र स्पष्ट एकट्ठा रखोंगा ॥

(दृष्टि) खैकांऽग्निद्विखंवेदंरामयंमेभूंखांश्रांभ्रंमेकांदिभे । दृष्ट्वा वर्जितदृश्यकस्य गुरुणा चेदष्टवेदे कृताः । मन्देनाऽङ्कंयंमेऽसृजा नंगगुंणेऽङ्का भादिजाः संस्कृताः भागघ्नत्ययवृद्धिखांऽनललवेनाऽब्ध्युंद्धृता दृग्भवेत् ॥

दृष्टा चन्द्र ११ । १ । १० । १४ से दृश्य रवि ३ । १६ ।

३। ३२ हीन होवा ४।१४।५३। १८ चार राशि का फल २। अग्रिम० अन्तर २ ऋणात्मक से भागादि १४। ५३। १८ गुणित २६। ४६। १६ तीस ३० से भाजित ०। ५६। ३२ आगतफल २ को ऋण कर के होवा १।०। २८ चार से भाजित होवा ०।१५ ७ सूर्य पर चन्द्रकी दृष्टि॥ इसी रीति से औरों की दृष्टि करना॥ (योगिनीदशा) स्वर्क्षं त्रिभिर्युतं चाष्टतष्टं शेषं दशा भवेत्। मङ्गला[1] पिङ्गला[2] धन्या[3] भ्रामरी[4] भद्रिका[5]ोल्किका[6]। सिद्धा[7] च सङ्कटा[8] चैकवृद्ध्या वर्षैर्दशेश्वराः। चन्द्रा[1]ऽर्क[2]सौम्य[3]भौमे[4]ज्य[5]सौरि[6]शुक्रा[7]ऽगवः[8] क्रमात्। शून्यं च संकटा ज्ञेया षट्त्रिंशद्वाजि-ताऽन्तरम्॥ वर्षादयः क्रमाद्दिग्भिः[10] खाब्धैः[20] खाभ्रेन्दु-भिर्हताः। विशेषे मङ्गलाभोगो ज्ञेयोऽसौ दिवसा-

त्मकः ॥ (जैसा) स्वर्क्ष पूर्वभाद्रपदा २५ तीन युक्त २८ आठ ८ से भाजित शेष चार आई भ्रामरी का स्वामी भौम की दश प्रथम वह लिखना। उस के पीछे और लिखना। अन्तर्दशा के वास्ते भ्रामरीका समय चारवर्ष है, उन के छःतीस से भाग देकर वर्ष आदि ध्रुवक निकलता है ० । १ । १० भ्रामरी अन्तर में लिखना, मङ्गला से शिरो करना, इसी रीती से भ्रामर्यां भ्रामरीविशेषदशा का ध्रुवक भी ० । ० । ४ । २६ । ४० करना चाहिये ॥ यद्वा भ्रामर्य-ऽन्तर ० । ५ । १० के वर्षादिकों को इन १० । ५० । १०० से गुणित ० । २५० । १००० साठ से नीचले लब्ध उपरि देकर हुवा यही दिनात्मक भ्रामरी विशेष का ध्रुवक ४ । २६ । ४० मङ्गला से शिरो करना (विंशोत्तरीदशा)

जन्मर्क्षसंख्या द्व्यूना स्यान्नवभक्ता दशापतिः । शेषं सूचंमराजीशबुकेशु इति नामकः ॥ षट् दशं

सप्तै धृतर्थः षोडशै नवेभूमयः । सप्तभुवः तथा सप्तै विंशतिश्च दशावधि ॥ आ पञ्चचत्वारिंद्धयातनाद्य-श्चतुर्गुणाः । दिना द्वादशमासोना ध्रुवकोऽयं दशा-भिधः ॥ वर्षाणि त्रिगुणीकृत्य मासाः पञ्चदशा-हताः । दिनार्धं प्रक्षिपेदूर्ध्वं ध्रुवकोऽन्तर्दशाभिधः ॥ क्रमतो हि सप्तैरऽथाऽदिमा जनिभस्था घटिकाः समाहताः । भभोगेन भक्ताः फलं भुक्तपाकस्तदूना दशा सा भवेद्भोग्यसंज्ञा ॥ (जैसा) जन्मर्क्ष पूर्भा की संख्या २५ दोनों २ हीन २३ नौ ६ से शेष रहा ५ हुई प्रथम जीव की दशा (काश्मीरिकसंस्कार) पञ्चतालीस तक चार से गुणित दिनात्मक नक्षत्रगतघटी बाराह १२ मासों से काटे हुई दशा का ध्रुवक, याने उस से गुणित जिस २ ग्रह के वर्ष हों उस २ ग्रह का दशामान होवे ।

किन्तु ४५ पञ्चतालीस से एक ही ध्रुवक रहेगा॥ (जैसा) नक्षत्रगतघटी ५५ । ३७ यहां पञ्चतालीस ४५ घटी चौगुणा १८० दिनात्मक है । मासात्मक ६ । ० बाराह १२ । मासों से हीन हुवा वर्षादिक ० । ६ । ० दशाका ध्रुवक । इस से सूर्य के छः वर्ष गुणित हुवा वर्षादि ३ । ० । ० चन्द्रके दसवर्ष १० गुणित हुई, वर्षादि ५ । ० । ० (इस पर नियम यह है) " रवीन्दू गीष्पतिः सौम्यो राहुः सौरः सितो रवेः । सध्रुवात्कुजकेतू चाऽग्रतः सर्वे पृथक्ग्रहाः " याने सूर्य ३ चन्द्र ५ का योग ८ जीवदशा है । तथा ध्रुव ० । ६ । ० युक्त जीव ८ से बुध ८ । ६ । ० से राहु ६ । ० । ० से शनि ६ । ६ । ० से शुक्र १० । ० । ० है और सूर्य ३ । ० । ० ध्रुव ० । ६ । ० युक्त ३ । ६ । ० भौम व केतु का दशापाक होता है ॥ (अन्तर्दशा) "जैसा" जीवदशा के वर्ष ८ । ० । ० त्रिगुण २४ मासादिक न होने से वही दिनादिक

ध्रुवक हुवा। उक्तरीति से सूर्य के छ वर्ष से गुणित १४४ वर्षादि ०। ४। २४ चन्द्र १० के गुणित ०। ८। ०। ० जीव १। ०। २४ बुध १। १। १८। ० राहु १। २। १२। ० शनि १। ३। ६। ० शु १। ४। ०। ० भौ ०। ५। १८। ० के ०। ५। १८। ०॥ (भुक्त भोग्य करणे की विधि यह है)

दशापति के वर्षों से गुणित नक्षत्रभुक्तघटियों के नक्षत्र भोगघटियों से भाजित का वर्षादिक फल भुक्तसंज्ञक होता है दशापति के वर्षों से काटकर शेष दशा का भोग्य काल होता॥ (जैसा) श्रावदि ४ रवौ पूभांप्र ७। ४२ इष्ट ३१। ५ भयात के वास्ते कल (ह्यस्तन) दिन तृतीया शनौ शतांप्र १। १६ रात्रिमान से २५। ४८ काटकर २४। ३२ इष्ट से ३१। ५ युक्तकर हुवा भयात ५५। ३७ और भभोग के वास्ते शतांप्र १। १६ व पूभांप्र ७। ४२ का अन्तर ६। २२ अगले भमान जादा होने के कारण साठ ६० से युक्त होवा ६६। २२ भभोग॥ अब भयातघटिका

५५। ३७ दशेश्वर जीव के दशा वर्षों १६ से गुणित ८८०। ७६२ सवर्णित को ५३५६२ भभोग ६६। २२ सवर्णित ३६८२ से भाग देकर पाये, वर्ष १३ शेष १८२६ द्वादश गुणित से २१६६२ पाये ५ शेष २००२ तीस गुणित से ६००६ पाये १५ दिन, शेष ३३० साठ से गुणित १६८०० से पाये घट्यादि ४। ५४ इकट्ठा होवा भुक्तकाल १३। ५। १५। ४। ५४ दशेश्वर वर्षों १६ से काटा आया दशा का भोग्यकाल २। ६। १४। ५५। ६ ऐसा ही और ग्रहों को भी भुक्त व भोग्यकाल लाना॥ (भावेशोंका फल प्रथमलग्नेश का) नीरोगो तनुपे लग्ने दीर्घजीवी महाबली। भूपतेर्भूमिलाभी स्यात् सुखी प्रथितसद्यशः ॥ १ ॥ लग्नेशे धनगे स्वाढ्यो दीर्घायुः स्थूलदेहयुक्। प्रतिष्ठां लभतेऽत्यर्थं सत्कर्मनिरतो भवेत् ॥ २ ॥ लग्नपे सहजे श्रेष्ठबन्धुमित्रादिसंगतः। धर्मी

दाताऽतिशूरश्च बलिष्ठः प्रभवेन्नरः ॥ ३ ॥ लग्नेशे तुर्यगे भूपप्रियं प्रचुरजीवितम् । स्निग्धं पित्रोर्भक्तिरतं नितरां कुरुते नरम् ॥ ४ ॥ लग्नेशे पञ्चमे पुत्रान्वितं वैरागिणं नरम् । प्रथितं सुस्थितं नृत्यगीतादिकलयाऽन्वितम् ॥ ५ ॥ लग्नेशे शत्रुगे स्वस्थो भूमिलाभी धनी बली । शत्रुघ्नो धर्मपत्नी च भवेत्स्वकुलदीपकः ॥ ६ ॥ लग्नेशे सप्तमे शीली तेजस्वी गुणभूषितः । तद्भार्यापि रूपवती सुशीला चतुराशया ॥ ७ ॥ लग्नेशे मृत्युगे स्वाढ्यः कृपणः स्वस्थआयुषा । क्रूरे काणः शुभैः पीनो विद्याविनयवर्जितः ॥ ८ ॥ लग्नेशे नवमे श्रीमान्बन्धुश्लाघी सुमित्रवान् । सुकृती च सुशीली च तेजस्वी ख्यातक-

र्मकृत् ॥ ९ ॥ लग्नेशे दशमे भूपमानी पण्डितधीरतः । गुरुमात्रऽर्चनरतो लाभैः सर्वैराधिष्ठितः ॥ १० ॥ लग्नेशे लाभगे पुत्रशौर्यधैर्यबलान्वितः । तेजस्वी व्यवहारेषु निपुणो जायते नरः ॥ ११ ॥ लग्नेशे द्वादशे तीक्ष्णभाषी सुनिष्ठुराशयः । बन्धुषु मलिनो नित्यं विदेशी दत्तभुक्तवान् ॥ १२ ॥ (धनेश का)

धनेशे लग्नगे श्रीशं कृपणं व्यवसायिनम् । सुकर्माणं भूपतुल्यभोगिनं नृपसंमतम् ॥ १ ॥ धनेशे धनगेऽनल्पभोगवित्तस्य भाजनम् । मणिरत्नधातुपरं करोति विविधार्थिनम् ॥ २ ॥ धनेशे सहजे सौम्ये बन्धुहीनं विवृत्तिकम् । क्रूरं भौमे भूपशत्रुं तस्करं च कुकर्मिणम् ॥ ३ ॥ धनेशे तुर्यगे सौम्ये पितृद्रव्या·

न्महोदयी । लक्ष्मीवान् कर्मनिष्णातः क्रूरे च व्यसनावृतः ॥ ४ ॥ धनेशे पुत्रगे स्वाढ्यः कर्मदक्षः कुकर्मवित् । व्यसनैर्दुःखभाग्नित्यं जायते पुरुषः खलु ॥ ५ ॥ धनेशे रिपुगे सौम्ये धनसंग्रहतत्परम् । रिपुघ्नं भूमिसंयुक्तं पापे तु धनवर्जितम् ॥ ६ ॥ धनेशे सप्तमे सौम्ये दानशौण्डं यशस्विनम् । तद्भार्या धनधीयुक्ता क्रूरे वन्ध्या भवेद्ध्रुवम् ॥ ७ ॥ धनेशे मृत्युगे त्वात्मघातको हस्तपात्रकः । उत्पन्नभुग्विलासी च परहिंसी स्वदैवभुक् ॥ ८ ॥ धनेशे नवमे सौम्ये वदान्यो बन्धुप्रीतिकृत् । क्रूरे दुर्गतितो भिक्षुर्विलम्बवृत्तिकारकः ॥ ९ ॥ धनेशे दशमे भूपमान्यो वन्द्योऽथवा नृपः । सौम्य ऋज्वाशयो मातृपित्रोश्च पालको

भवेत् ॥ १० ॥ धनेशे लाभगे ख्यातो व्यवहारी श्रियास्पदः । लोकौघपालको नित्यं परव्यसनहारकः ॥ ११ ॥ धनेशे द्वादशे क्रूरे भिक्षुकश्चटुलोऽलसः । कर्मण्यऽनिष्टभिक्षाशी सौम्येऽतिसुखितो भवेत् ॥ १२ ॥

